# व्याकरणसिद्धान्तरीत्या शब्दसाधुत्वसमीक्षणम्

**डा. जगन्नाथ शर्मा सापकोटा**
सहप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः
महेशसंस्कृतगुरुकुलम्, देवघट्टः
jagannathsharma9847@gmail.com

**लेखसारः**

लेखेऽस्मिन्पाणिनीयव्याकरणरीत्या शब्दसाधुत्वस्य समीक्षणं महाभाष्यानुसारिवैयाकरणभूषणसारमञ्जूषादि-विविधग्रन्थनिदर्शितदृशा प्रस्तूयते। तत्रादौ किं नाम साधुत्वं, शक्तत्वस्यैव साधुत्वलक्षणत्वे का विप्रतिपत्तिरित्यादिकं साधु विमृश्यान्ते वैयाकरणसिद्धान्तानुसारिसाधुत्वस्वरूपं सप्रमाणं निरूप्यते।

**प्रमुखाः शब्दाः -** अपभाषितम्, अपाणिनीयम्, शक्यार्थः, शक्तिः, साधुत्वम्।

**विषयपरिचयः**

**'साध्वनुशासनेऽस्मिन्शास्त्रे-'** (शास्त्री, २०२३, पृ.१६१) इत्यादिभाष्यकारवचनात्शास्त्रमिदं शब्दसाधुत्वानुशासकमेवेत्यत्र नास्ति काचित्संशीतिः। किञ्च **"एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति"** (महाभाष्यम्६.१.८४) इति श्रुतिः साधुशब्दप्रयोगस्येष्टसाधकत्वं प्रबोधयति। अपि च **"तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै, नापभाषितवै"** (शास्त्री, २०२३, पृ.२८) इति निन्दार्थवादेनापशब्दप्रयोगस्याधर्मजनकत्वाध्यवसानात् श्रेयस्कामैरपशब्दपरिहारेण साधुशब्दा एव प्रयोक्तव्या इत्यवगम्यते। तत्र चानन्तेषु नाम शब्देषु **"एते साधवः, एतेऽसाधवः"** इति साधुत्वासधुत्वे विभज्य निर्देष्टुं न शक्यत इति तत्रादौ गौरित्यादिषु साधुषु शब्देषु ज्ञातेष्वेव तद्भिन्नानां 'गावी, गोणी, गोता, गोपोतलिका' इत्यादीनामनन्तानामसाधुत्वनिश्चयसम्भ वात् पुनस्तत्प्रतिपत्तये न पृथग्यत्न आस्थेयो भवतीति व्याकरणेन साधुशब्दा एवानुशिष्यन्ते। तत्र च विशेषज्ञानस्य सामान्यज्ञानाधीनत्वेन सर्वप्रथमतः किं नाम साधुत्वमित्यवश्यं जिज्ञासितं भवतीति तन्निवारकः, साधुत्वविषयकविचिकित्साचिकित्सालयभूतोऽयं लेखोऽवश्यमपि न केवलं शाब्दिकानामपि तु निखिलानामपि संस्कृतोपासकानां महत उपकाराय जायते।

**लेखसमस्याः-**

तत्र महाभाष्ये पस्पशायामुक्तम्-

**"यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले।**
**सोनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥ "** (शास्त्री, २०२३, पृ.७२)

इति। एवं यज्ञकर्मणि **"आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्"** (शास्त्री, २०२३, पृ.३२) इत्यनेन अपशब्दप्रयोक्तुः दोषपुरस्सरं प्रायश्चित्तं श्रूयते। आलङ्कारिकैश्च काव्येऽसाधुशब्दप्रयोगे **च्युतसंस्कृत्या**ख्यो दोष उद्भाव्यते इति तत्र साधुत्वासाधुत्वपरिचायकोऽयं लेखकः। अस्माच्च लेखात्पूर्वं समुपस्थिताः विशेषत इमाः समस्याः भवितुमर्हन्ति-

क) वैयाकरणसिद्धान्ते किं नाम साधुत्वम्।

ख) दर्शनान्तररीत्या शक्तत्वस्यैव साधुत्वलक्षणत्वे का विप्रतिपत्तिः।

ग) अपभ्रंशेषु शक्तिः कल्प्यते न वा।

घ) वचन्तीत्यादीनां शास्त्रानुसारित्वेऽप्यसाधुत्वं कथम्। इत्यादि।

## लेखोद्देश्यम्

उपदर्शितसमस्यानां समाधानमेव लेखस्यास्य प्रमुखमुद्देश्यम्। तथा हि अस्वशब्दस्य निर्धनार्थे सत्यपि साधुत्वे, वाजिरूपार्थेऽसाधुत्वमेवेति प्रातिस्विकरूपेण शब्दोऽयं साधुरयमसाधुरिति वक्तुमशक्यत्वात् साधुत्वं विशेषतः निर्णीयैव तद्भिन्नस्यासाधुत्वनिर्णय इति शब्दसाधुत्वसमीक्षणमेवास्य प्रमुखमुद्देश्यम्। तथा चास्य लेखस्योद्देश्यमपि सामान्यतः एवंरीत्या द्रष्टुं शक्यते-

क) वैयाकरणसिद्धान्तानुसारिशब्दसाधुत्वसुव्यवस्थापनम्,

ख) दर्शनान्तराभिमततल्लक्षणत्वे दोषप्रतिपादनम्,

ग) अपभ्रंशेषु शक्तेः स्वीकारस्य सप्रमाणं प्रतिपादनम्,

घ) शास्त्रानुसारित्वेऽपि लोकप्रयोगानर्हतया तस्यासाधुत्वप्रतिपादनम्।

## अध्ययनविधिः-

प्रस्तुतशोधकार्ये सन्दर्भे विश्लेषणविधिः, तुलनात्मकविधिश्चाश्रितो विद्यते। एवं शाब्दिकाभिमतसाधुत्वविमर्शे तुलनात्मकविधिः, विवरणात्मकशैल्या समीक्षणात्मकश्च विधिः समाश्रितो वर्तते।

## सामग्रीसङ्कलनप्रस्तुतिः-

'व्याकरणसिद्धान्तरीत्या शब्दसाधुत्वसमीक्षणम्' इत्याख्येऽस्मिन्विषये प्रस्तुतशोधकार्यस्य सम्पादनाय कौण्डभट्टकृतवैयाकरणभूषणसारः, नागेशभट्टविरचितशेखरलघुमञ्जूष इत्यादीनां ग्रन्थानां, तद्व्याख्यानग्रन्थानाञ्च लेखसामग्रीरूपेण सङ्कलनं कृतं वर्तते। एवमेव वाक्यपदीयम्, प्रदीपोद्योतसहितमहाभाष्यम्, काशिकादिग्रन्थाश्चात्र लेखे सहायकरूपेणोपयुक्ताः वर्तन्ते।

## विषयप्रवेशः

**एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवती"** (शास्त्री, २०२३, पृ.८४) ति श्रुतिः साधुशब्दप्रयोगे फलं बोधयति। तस्या अयमर्थः सम्यक् = सम्यक्त्वेन साधुत्वेन ज्ञातः, शास्त्रान्वितः शास्त्रव्युत्पादनमार्गेणाऽनुसंहितः, सुप्रयुक्तः शिक्षोक्तरीत्या यथास्थानं यथाप्रयत्नं प्रयुक्तः शब्दः कामानां दोग्धा भवतीति। एकस्यापि साधुशब्दस्य फलजनकत्वेऽपि यथा फलभूयस्त्वकामनया काम्यकर्मणां पुना पुनरनुष्ठानेऽधिकारिणां प्रवृत्तिः, तद्वत् द्वितीयतृतीयादिसाधुशब्दप्रयोगे लोकानां प्रवृत्तिरप्युपपद्यते। यद्यपि **'साधूनेव भाषेत'** इति श्रुतिर्नास्ति, तथापि **'एकः शब्दः-"** इत्यादिश्रुतेरेवं "समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देने''ति भाष्याच्च **'साधुभिर्भाषितव्यम्, नासाधुभिः'** इति नियमः कल्प्यते। तत्र च शक्तत्वं साधुत्वमिति स्वीकारे वक्ष्यमाणदोषप्रसक्तिरिति पुण्यजनकतावच्छेकतया सिद्धःजातिविशेष एव साधुत्वमित्यङ्गीक्रियते। स च यथा अध्ययनविधिसिद्धविद्याधानसिद्धाग्निमत्वरूपाधिकारवतोऽपि ब्राह्मणस्य राजसूययागकरणे न फलजनकत्वं तथा गवादिपदानां सास्नादिमदर्थे साधुत्वेऽपि अश्वादितात्पर्येण प्रयुक्ते न साधुत्वम्। **"सिद्धे शब्दार्थथसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु"** (शास्त्री, २०२३, पृ.६५)

इति वार्तिकञ्चोपर्युक्तार्थेऽनुकूलमिति बोध्यम्।

## साधुत्वलक्षणम्-

तत्र साधुत्वं नाम किम्? इति चेदुक्तरीत्या **"तत्तदर्थविशिष्टः शब्दनिष्ठः धर्मजनकतावच्छेदकतया सिद्धो जातिविशेषः"** इति। शब्दस्य धर्मजनकत्वे प्रमाणभूता **"एक शब्द-"** इत्युक्तिः **"समानायामर्थावगतौ-"** इति भाष्यञ्चोपन्यस्तमेव। शब्दे तत्तदर्थविशिष्टत्वनिवेशनात् "अस्व" इति शब्दस्य निर्धनार्थे सत्यपि साधुत्वे, वाजिरूपार्थविशिष्टत्वाभावात् न तस्मिन्नर्थे तस्य साधुत्वम्। शब्दे तद्वैशिष्ट्यं च शक्तिमत्वसम्बन्धेन। नन्वेवं गङ्गाया घोष" इत्यादौ तीराद्यर्थप्रयुक्तस्य गङ्गादिपदस्य साधुत्वानुपपत्तिरिति चेन्न। तत्र पश्चात् समभिव्याहृतपदार्थान्तरान्वयाद्यनुपपत्तिप्रतिसन्धानेन शक्यार्थबोधे निर्वृत्ते लक्षणया शक्यार्थसम्बन्धिलाक्षणिकबोधस्य जायमानत्वेन लक्षणाजन्यबोधे शक्यार्थबोधस्य कारणत्वस्यावश्यकतया शक्यार्थमादायैव साधुत्वोपपत्तेः। अत एव गङ्गायामित्यादौ टाबाद्युत्पत्तिः। अन्यथा नदीविशेषवाचकस्य तस्य तीररूपार्थबोधकत्वे स्त्रीत्वविशिष्टार्थबोधकत्वाभावात् तदनुपपत्तिरेव स्यात्। साध्वनुशासनेन व्याकरणेन शक्यार्थमादाय पूर्वं टाबादिकार्यस्य विधानात् पश्चात् **"भुक्तवन्तं प्रति मा भुक्थाः:"** इति तीररुपार्थबोधकत्वेऽपि न टाबादीनां निवृत्तिः, अन्तरङ्गत्वेन पूर्वजातसंस्कारबाधायोगाच्च।

## पूर्वपक्षिमतम्-

अत्र केचित्- शक्तत्वमेव साधुत्वम्, अपभ्रंशेषु शक्त्यभावादेव न साधुत्वम्। न च तत्र शक्त्यभावे स्त्रीबालाद्युच्चरितात् अपभ्रंशात् बोधानुपपत्तिरिति वाच्यम्। तत्रापि साधुशब्दस्मरणात् ततो बोधोपपत्तेः। तदुक्तं हरिणा

**"ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।**
**अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते॥**
**अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः॥"** (शास्त्री, सन् २०१६, पृ.५१६) **इति।**

असाधवः साधुष्वनुमानेन = साधुशब्दविषयकस्मरणेन बोधोत्पत्तिहेतवो भवन्ति। असाधोः साधुप्रकृतिकत्त्वेन साधुशब्दविदां तथा बोधस्य सम्भवात् इत्यभिप्रायः।

नन्वेवमपि साधुशब्दमजानतां बालादीनां ततो बोधानुपपत्तिरिति चेन्न। तेषामसाधुषु शक्तिभ्रमेण तदुपपत्तेः। कथं शक्तिभ्रमस्तेषाम्? इति चेदुच्यते। केनचिदशक्त्या "गावी" इति प्रयुक्ते, प्रयोज्यस्य साधुस्मरणेन गोविषयकबोधे निर्वृत्ते, तत्पश्यतस्तटस्थस्य बालादेः गावीशब्दादेव तस्य बोध इति आद्यः शक्तिभ्रमः तन्मूलकशक्तिभ्रमोऽन्येषामपीति। किञ्चैकस्य गवादेः साधुशब्दस्य "गावी, गोणी, गोता, गोपोतलिका" इत्येवमादयो बहवोऽपभ्रंशा इति तत्र सर्वत्रशक्तिकल्पने गौरवात् नापभ्रंशेषु शक्तिकल्पनं न्याय्यम्। पर्यायेषु तु प्रत्येकं शिष्टपरिगृहीतत्वाविशेषात् सर्वत्र शक्तिः सिध्यतीति "शक्तत्वं साधुत्व" मित्यभ्युपगमे न काचित्क्षतिरित्याहुः।

## पूर्वपक्षिमतनिरासः-

वस्तुतस्तु 'शक्तत्वमेव साधुत्वमि'ति न सम्यक्। असाधुतः साधुस्मरणं विनापि बोधस्यानुभवसिद्धतया तत्रापि शक्तिस्वीकारस्यावश्यकत्वात्। उच्चारितस्यैवार्थप्रत्यायकत्वेन स्मृतसाधुतो बोधासम्भवाच्च। अत एव पामराणां साक्षादेव ततो बोध उपपद्यते। शक्तिभ्रमेण बोध इति तु न सम्यक्, उत्तरकाले तद्बाधाभावात्। तत्तद्देशीयशिष्टानां संस्कृतभिन्नासु तद्देशीयभाषासु जायमानस्य निर्विचिकित्सितशक्तत्वप्रत्ययस्य बाधकं विना भ्रमत्वायोगात्। उक्तं च

हरिणा, अनूदितं च दीक्षितेन्द्रैः--

**"वाचकत्वाविशेषेऽपि नियमः पुण्यपापयु"** (वाक्यपदीयम्, ३.३.३०) इति।

भगवता भाष्यकारेणाऽपि **"समानायामर्थावगतौ शब्दैश्च चापशब्दैश्च शास्त्रेण धर्मनियमः"** (शास्त्री, २०२३, पृ.६७) इति वदतापभ्रंशेष्वपि शक्तिरभ्युपगतैव। अत एव स्त्रीबालादिभिः प्राकृतैः प्रयुक्ते साधावर्थसंशये तत्तदपभ्रंशैरेव निर्णयः करिष्यते। न चापभ्रंशेष्वपि शक्तिकल्पने गौरवम्, साधुष्विव तत्रापि शक्तिग्राहकशिरोमणेर्व्यप्वहारस्य तुल्यत्वात्, पर्यायेष्विव तत्रापि तत्कल्पनाया औचित्यात्। यत्तु पर्यायाणां सकलशिष्टपरिगृहीतत्वात्,तत्तद्देशीयशिष्टमात्रपरिगृहीत्वात् न पर्यायतुल्यता तेषामिति, तन्न। **"शवतिर्गतिकर्मा कम्बोजेवेच भाषितो भवाति, विकार एवैनमार्या भाषन्ते"** (शास्त्री, २०२३, पृ.७१) इत्यादि भाष्यदर्शितरीत्या तद्देशीयनियतसंस्कृतानामपि तत्तदर्थे सकलशिष्टपरिगृहीतत्वाभावात् शक्तिमत्वानुपपत्तेः। अपभ्रंशानामसाधुत्वात्तु कोशे पर्यायाणामिव पाठो न कृतः। न चैव तत्रासाधुत्वनिश्चये ततो बोधानुपपत्तिरिति वाच्यम्। तत्सत्वेऽपि ततो बोधस्यानुभवसिद्धत्वेन तादृशनिश्चयस्य प्रतिबन्धकत्वाभावात्। नन्वेवमपभ्रंशेषु शक्त्यभ्युपगमेऽर्थवत्सूत्रेण प्रातिपादिकत्वापत्तौ ततः सुबुत्पत्यापत्तिरिति चेन्न इष्टापत्तेः , अन्यथा **"यर्वाणस्तर्वाणः"** इति भाष्योक्ते प्रयोगे णान्ताज्जसोऽसङ्गतत्वापत्तेः। एवं च तद्देशभाषानुसारेण कियमाणानां "कूची मञ्ची" इत्यादीनां शास्त्रानन्वितत्वेऽपि, तेभ्यः लृतकादियदृच्छाशब्देभ्यश्च विभक्त्युत्पत्तिरपि साधुरेवेति केचित्।

अन्ये तु **"साध्वनुशासनेऽस्मिञ्छास्त्रे-"** (शास्त्री, २०२३, पृ.१६१) इति तत्र तत्र भाष्ये उक्तत्वेन व्याकरणस्य साध्वनुशासकत्वेनार्थवत्वेन साधूनामेव संज्ञाविधावुद्देश्यत्वेन न तेषां प्रातिपदिकत्वं युक्तम्। अत एव साधूनामेव प्रत्ययविधावुद्देश्यत्वेन ततो विभक्त्युत्पत्तिरप्यसम्भाविनी। "यर्वाणस्तर्वाण" इति न जसन्तावेतौ शब्दौ, किन्तु तादृशापशब्दयोर्भाष्ये यथावदनुकरणं बोध्यम्। एवं प्रवृत्तिनिमित्तैक्येऽन्वाख्यातगवादिशब्दैरनन्वाख्यातगाव्यादिशब्दानां निवर्तनात्, "कूची मञ्ची" इत्यादीनां नाम्नां **"द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यात्न तद्धितमि"**(शास्त्री, २०२३, पृ.४८) त्यादिशास्त्रेणाशास्त्रीयत्वाध्यवसानात्, लृतकादियदृच्छाशब्दानां च शिष्टाप्रयुक्तत्वेनासधुत्वाभ्युपगनमात् प्रत्ययविधावनुद्देश्यत्वमेवेत्याहुः। तस्मात् **"शक्तत्वं साधुत्वम्"** इत्युच्यमानेऽपभ्रंशादीनामपि शास्त्राविषयत्वेन साधुत्वापत्तिर्दुर्वारैव।

## अपाणिनीयानामसाधुत्वनिरूपणम्-

शब्दनिष्ठसाधुत्वस्य प्रत्यक्षाद्यवेद्यत्वेन सांधुत्वनिश्चयो यद्यपि न सम्भवति तथापि व्याकरणेन तत्र साधुत्वनिश्चय: सम्भवति। व्याकरणप्रणेतॄणां महर्षीणां तु आर्षज्ञानेन तन्निश्चयः। अत एव तेषां लक्ष्यैकचक्षुष्कत्वव्यवहारः। तादृशव्याकरणेषु बहुषु सत्स्वपि अद्यत्वे साधुत्वव्यवस्थापकं पाणिनीयमेव। **"शताच्च ठन्यतावशते"** (पाणिनीयाष्टाध्यायीसूत्रम्, ५.१.२१)इति सूत्रे **"नियतकालाश्च स्मृतयो व्यवस्थाहेतव" इति** मुनित्रयमतेनाद्यत्वे **"साध्वसाधुप्रविभागः"** इति कैयटेन स्पष्टमभिहित्वात् आपिशलकाशकृत्स्नादिव्याकरणानामिदानीं साधुत्वव्यवस्थापकत्वाभावाध्यवसानात्।

**अत्राक्षेपः**

पाणिन्यादिवत् चन्द्रादीनामपि अनाप्तत्वाभावाविशेषात् तद्वचसामपि प्रामाण्यस्यावश्यकतया मुनित्रयालक्षितानां तैर्व्युत्पादितानां बहूनां शब्दानां साधुत्वमभ्युपेयमेव। अन्यथा व्यासमनुवाल्मीकिप्रभृतिभिर्महर्षिभिः प्रणीतेषु

महाभारतादिषु दृश्यमानानां मुनित्रयासम्मतानामसाधुत्वापत्तेः । न च तेषां महत्मनां सर्वज्ञकल्पानां व्यकरणानभिज्ञत्व-सम्भवोऽस्ति । उक्तं च **"दृष्ट्वा बहुव्याकरणं मुनिना भारतं कृतम्"**इति । एवं च व्यासादिशिष्टप्रयुक्तानामपाणि-नीयानामपि साधुत्वसम्पादनाय ऐन्द्रादिव्याकरणानामपि स्मृतित्वाविशेषाच्च प्रामाण्यस्याङ्गीकार्यतया तदप्रामाण्य-कथनमपसहनीयमेवेति ।

**तत्र समाधानम्**- यदुक्तम्, शिष्टप्रयुक्तानामपाणिनीयानामपि साधुत्वसम्पादनाय पाणिनीतरव्याकरणप्रामाण्यमङ्गीन् कार्यमेवेति तन्न, यतो न वयं तासां स्मृतीनां प्रामाण्यमपाकरिष्यामः, किं तु **"कलौ पारशरस्मृताः"** (पाराशरसूक्तिः, १/२४) इतिवत् कालान्तर एव साधुत्वव्यवस्थापकत्वमिति प्रतिपादयामः । न च तावता तासां प्रामाण्यं हीयेत । न ह्यश्वालम्भादीनामिदानीमननुष्ठेयत्वेऽपि न तद्बोधकश्रुतीनामप्रामाण्यमिति वक्तुं शक्यम् । ननु अश्वालम्भादीनां कलौ निषेधवचनोपलम्भात् इदानीमननुष्ठेयत्वेऽपि पाणिनीयभिन्नव्याकरणानामिदानीं साधुत्वव्यवस्थापकत्वाभावे हेतुं न पश्यामः इति चेत्, मैवम् । चन्द्रादिभिः **"चान्द्रादयस्तु मन्यन्ते सर्वस्मादुभयं पदम्"**इति धातुसामन्यस्योभयपदि-त्वाभ्युपगमेऽपि, पाणिनिनये **"स्वरितञितः कर्त्रभिप्राये क्रियाफले"** (पाणिनीयाष्टाध्यायीसूत्रम्, १.३.७२) इत्या-दिना पदस्य व्यवस्थिततत्वेनैव विधानात्, तत्र परस्परविरोधे सम्मति शिष्टैः सर्वैरपि पाणिनिसम्मतपदव्यवस्थाया एवा-द्रियमाणत्वात् । पूर्वोक्तकैयटवचनाच्च । एवं च युध्यति, बाधति इत्यादयोऽसाधवः अपाणिनीयत्वात् गाव्यादिवत् इत्यसाधुत्वसाधकानुमानमपि समीचीनमेव । न चैवमार्षग्रन्थेषु **"सागरं तर्तुकामस्य", "स्तुवीत चरितैरिमैः", "अष्टाविंशतितमे युगे"** इत्यादौ परिदृश्यमानानां "तर्तुकामस्य" इत्यादीनामप्यपाणिनीयत्वादसाधुत्वापत्या इदमनु-मानं दुष्टमिति वाच्यम् पाणिनिप्राक्कालिकऋष्युच्चारितेषु तेषु व्याकरणान्तरेणैव साधुत्वव्यवस्थापनात् । तथा च पूर्वोक्तानुमाने पाणिन्यनन्तरकालिकपुरुषोच्चारितापाणिनीयत्वस्यैव पक्षतावच्छेदकत्वमिति पर्यवस्यति अन्यथेदा-नीमपि **"कुर्मि" "दद्मि"**इत्यादीनामसाधुत्वानुपपत्तेः । अपि च **"छन्दोवत्सूत्राणि भवन्ति"** (शास्त्री, २०२३, पृ.१५३) इति वृद्धिसूत्रस्थभाष्यप्रामाण्येनाष्टाध्यायीवत् रामायणादीनां सूत्रत्वाभावेऽपि आर्षत्वाविशेषात् छन्दोव-त्वातिदेशस्यार्षप्रणीतग्रन्थमात्रोपलक्षकतया तत्रापि **"व्यत्ययो बहुलम्"** (पाणिनीयाष्टाध्यायीसूत्रम्, ३.१.८५) इत्यादिच्छान्दसविधीनां प्रवृत्यभ्युपगमेन तत्रापाणिनीयत्वरूपहेतोरसत्वाच्च न च शब्दानां नित्यत्वात् उच्चारणभेदे-नाभिव्यक्तिभेदेऽपि वस्तुतो भेदाभावेनैकस्मिन्नेव साधुत्वासाधुत्वयोर्विरुद्धयोर्धर्मयोः समावेशोऽसम्भवीति वाच्यम् । शब्दैकत्वपक्षेऽपि औपाधिकभेदमाश्रित्य साधुत्वासाधुत्वयोर्व्यवस्थायाः सुसाधत्वात् । अत एव **"अदुह्र"** (दुहेर्लुङि झे रूपम्) इत्यादेश्छान्दसस्य छान्दसप्रक्रियानुसारेण साधुत्वसत्वेऽपि, अच्छान्दसत्वे तस्यैवासाधुत्वमभ्युपगतं सर्वैरित्येतत् सुष्ठूपपद्यते ।

## आर्षप्रयोगानां साधुत्वासाधुत्वविमर्शः-

आर्षप्रयोगस्थले प्राचीनवैयाकरणा आर्षत्वात्साधुरित्येवाभिप्रयन्ति । परन्तु तदयुक्तमिति नव्याः। तथाहि एतादृशप्रयोगानामार्षत्वेऽपि व्याकरणानिष्पन्नत्वेनासाधुत्वमेव । न चैवं तेषामसाधुत्वे याज्ञे कर्मणि रामायणादिपारा-यणे तत्प्रयोगे प्रत्यवायोत्पत्तिः, यज्ञमध्येऽसाधुशब्दप्रयोगे पापोत्पत्तेः भाष्यादौ स्पष्टत्वादिति वाच्यम्, अयाज्यस्यापि त्रिशङ्कोः विश्वामित्रकृतयाजनेऽपि तपोमाहात्म्येन दोषाभाव इव ऋषीणां तपोमाहात्म्येन यज्ञमध्ये रामायणाद्यन्तर्ग-तैतादृशासाधुशब्दपाठेऽपि दोषाभावात् । स्वातन्त्र्येणेदृशं प्रयुञ्जाना अन्ये तु प्रत्यवयन्त्येव । अत एव **"यू स्त्र्याख्यौ नदी"** (पाणिनीयाष्टाध्यायीसूत्रम्, १.४.३) इति सूत्रे भाष्ये **'छन्दोवत्कवयः कुर्वन्ति, न ह्येषेष्टिरस्ति'** (शास्त्री,

२०२३, पृ.२१९) इत्युक्तमित्याहुः। तथा च व्यासप्रभृतीनां तत्वज्ञानिनामसाधुप्रयोगेऽपि नाधर्मसंस्पर्शः। तन्महिमर्व-शादेव तद्ग्रन्थपारायणादौ तदुच्चारणेऽस्माकमपि तथा, किन्तु व्यत्यासेनोच्चारणे एवाधर्म इति। इदञ्च पतिशब्दथ् निरूपणावसरे लघुशब्देन्दुशेखरे निरूपितम्।

## आधुनिकप्रयोगानामसाधुत्वनिरूपणम्-

आधुनिकशिष्टप्रयुक्तानामप्यपाणिनीयानामसाधुत्वमेव। अत एव कौमुद्यादौ **"कालाट्ठञ्"** (पाणिनीयाष्टाध्यायीसूत्रम्, ४.३.११) इत्यादिसूत्रे तादृशानां "अपभ्रंशा एवैते इति प्रामाणिकाः" इत्येवमादिरूपेणाभिधानं सङ्गच्छते। क्वचित्तुउपायान्तरेण वा तत्र पाणिनीयत्वमेव सम्पाद्य साधुत्वं प्रतिपादनीयम्। तादृशप्रकारश्च व्याकरणग्रन्थेषु तत्र तत्र प्रदर्शित एव। यत्तु तादृशशब्दानामाधुनिकप्रणीतव्याकरणेन साधुत्वं कल्पयन्ति, यथा अल्पमेधः प्रभृतीनां **"मन्दाल्पाभ्यां च मेधात्" (वर्धमानसूत्रम्)**इत्यादिना साधुत्वमिति, तत्तु न सम्यक्। यत आधुनिककल्पितानां तेषामनार्षत्वात् साक्षात् प्रामाण्याभावेन स्मृतीनां श्रुत्यधीनप्रामाण्यकत्ववत् मुनित्रयवचनाधीनप्रामाण्यकत्वस्यैवौ-चित्यात्। कदाचित् सूक्ष्ममतीनामपि भ्रमप्रमादादिदर्शनेन तादृशानार्षग्रन्थेषु शिष्टानामनाश्वासाच्च। किञ्च बहूनां व्यकरणानां स्वातन्त्र्येणैव साधुत्वव्यवस्थापकत्वाभ्युपगमे, एकेनैकस्मिन् शब्देऽसाधुत्वनिश्चये, तत्रैवापरेण साधुत्व-व्यवस्थापने साध्वसाधुप्रविभागव्यवस्थैवोच्छिद्येत। परन्तु क्वचित् व्याख्याकृद्भिः स्वीयव्याख्यासमर्थनाय व्याकर-णान्तरमुपयोक्ष्यते। यथा प्रौढमनोरमायाम् कथं तर्हि पुरुषाराधनमृते इति। उभसर्वतसोरित्यत्र दृशिग्रहणात् चैत्रं याव-च्छीतमित्यादाविव ऋतेयोगे द्वितीयापि साधुरित्याहुः। युक्तं चैतत्। **"ऋते द्वितीया च" इति** चान्द्रसूत्रात् इति। एवं चैतादृशस्थले बहुत्र व्याकरणान्तरणैव साधुत्वोपपादनसम्भवेऽपि, मुनित्रयवचनेनैव साधुत्वव्यवस्थापनप्रयासोऽप्य-पाणिनीयानाम् असाधुत्वमित्येतदेव द्रढयति। तस्मात् सुष्टूक्तमपाणिनीयानामसाधुत्वमिति।

## निष्कर्ष:

उपदर्शितहेतोः पाणिनीयव्याकरणानुशिष्टस्यैव साधुत्वम्। इदन्त्वत्रावधेयम्- व्याकरणानुशिष्टानामपि केषु-ञ्चित् शिष्टाप्रयुक्तानामसाधुत्वमिति। अत एव **"वचन्ति"** इत्यादीनामसाधुत्वं स्वीकृतं सर्वैः। एवं शिष्टप्रयुक्तानां सर्वेषां साधुत्वमित्यपि न। यतः कदाचित् तेऽपि अभ्युदयरूपफलेऽलोलुपाः सन्तोऽसाधूनपि प्रयुञ्जीरन्। न च तैः तदा **"तेऽसुराः हेलय-"** (शास्त्री, २०२३, पृ.७२) इति निन्दार्थवादलभ्यः "साधूनेव प्रयुञ्जीत, नासाधून्" इति नियमः परित्यक्तो भवेत् इति शक्यम्। तादृशनियमस्य यज्ञसम्बद्धपुरुषमात्रविषयकत्वात्। तदिदमुपपादितं भगवता भाष्यकारेण "याज्ञे कर्मणि स नियमोऽन्यत्रानियमः। एवं हि श्रूयते यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः। ते तत्र भवन्तो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयु-ञ्जते, याज्ञे पुनः कर्मणि नापभाषन्ते" इत्यादिना। तर्हि शिष्टा नाम के ? इति चेत्, उच्यते। **"शब्दतत्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिताः"** (वाक्यपदीयम्, ३.१३.२१) इति हर्युक्तत्वात् निखिलशब्दविशेष्यकसाधुत्वप्रकारकयथा-र्थज्ञानवन्तः शिष्टा इति। एवं च साधुशब्दप्रयोक्तृत्वं शिष्टत्वमिति वक्तुमशक्यतया **"साधुत्वं शिष्टप्रयुक्तत्वम्"** इत्येतन्निराकरणीयम्। शिष्टप्रयुक्तत्वेन साधुत्वम्, साधुशब्दप्रयोक्तृत्वेन शिष्टत्वमिति परस्पराश्रयप्रसङ्गाच्च। **पृषोदरादिसूत्रे** (पाणिनीयाष्टाध्यायीसूत्रम्, ६.३.१०९) भाष्ये तु एवमन्योन्याश्रयमाशङ्का शिष्टलक्षणमेवमभ्यधायि - **"एतस्मिन्नार्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपाः अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चि-द्विद्यायाः पारगाः तत्रभवन्तः शिष्टाः"** इति, **"नूनमस्य दैवानुग्रहः स्वभावो वा योऽयं न चाष्टाध्यायीमधीते**

**ये चास्यां विहिताः शब्दाः तांश्च प्रयुङ्क्ते"** इति च। परन्तुशास्त्रस्मरणपूर्वके प्रयोग एव धर्मोत्पत्तिरिति(शास्त्री, २०२३, पृ.२६१) **"शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन"** (शास्त्री, २०२३, पृ.७३) इति वार्तिके, भाष्ये च स्पष्टम्। तथा च **"व्याकरणान्वितत्वे सति शिष्टप्रयुक्तत्वं साधुत्वम्"** इति लक्षणं त्वनवद्यमेवेति शिवम्।

## कृतज्ञताज्ञापनम्

शोधस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च साधु परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्य: सर्वेभ्यो विशेषज्ञेभ्यो गुरुजनेभ्यः सहायकेभ्यश्चान्येभ्य: हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची-

द्विवेदी, श्रीब्रह्मदत्त:, (सन्१९८५) श्रीकौण्डभट्टकृत-वैयाकरणभूषणसार:(दर्पणहिन्दीभाष्योपेत:), वाराणसी : चौखम्बा ओरियन्टालिया।

शास्त्री, महामहोपाध्यायपेरिसूर्यनारायण, (सन्२०१६) श्रीकौण्डभट्टकृत-वैयाकरणभूषणसार:, तिरुपति : श्रीवेङ्कट्टेश्वरवेदविश्वविद्यालय:,।

शास्त्री, महामहोपाध्यायपेरिसूर्यनारायणः (सन्१९८७) श्रीनागेशभट्टकृतवैयाकरणसिद्धान्तलघुमञ्जूषा, तिरुपति : राष्ट्रियसंस्कृतविश्वविद्यालय:(केन्द्रियविश्वविद्यालय:)।

श्रीभार्गव, शास्त्री (सन्२०२३) महर्षिः पतञ्जलिः, महाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान।

मिश्र, वंशीधरमिश्रविरचितवंशीव्याख्योपेता श्रीनागेशभट्टविरचिता परमलघमञ्जुषा(सन् २००६), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

पाणिनिसूत्रम्, अष्टाध्यायी प्राविधिकमाध्यमेन {ashtadhyayi.com(app)} नीलेश बोडस।

***